**CLASS : 10th (Secondary)** **Code No.**

*Roll No.* | | | | | | | | | | |

# संस्कृत

## शेमुषी (नई पुस्तक)

*समय : 3 घण्टे ]* *[ पूर्णांक : 80*

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 8 तथा प्रश्न 16 हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देशः–*** *(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

### खण्डः 'क'
### (अपठित-अवबोधनम्)

**1.** अधोलिखितं गद्यांशं पठित्वा अधस्तानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $4 \times 2 = 8$

संसारे कुटिला अपि जनाः सन्ति, सरलाः अपि। सरलाः जनाः प्रकृत्या परेषां हितकारिणः भवन्ति। परन्तु कुटिलाः जनाः स्वाभावेन परेषाम् अहितम् इच्छन्ति। तेषां शक्तिः परेषां पीउनाय बुद्धिश्च परेषां वञ्चनाय भवति। तेषां गतिः विचित्रा भवति।

**प्रश्नाः –**

(क) संसारे कीदृशाः जनाः सन्ति ?

(ख) के परेषां हितकारिणः भवन्ति ?

(ग) कुटिलाः जनाः किम् इच्छन्ति ?

(घ) कुटिलजनानाम् गतिः कीदृशी ?

**खण्डः 'ख'**

**(रचनात्मकं-कार्यम्)**

**2.** (क) रजतः 'छात्रावास-जीवन' इति विषये पितरम् प्रति पत्रमेकम् लिखति। मञ्जूषातः पदानि विचित्य पत्रे रिक्तस्थानानि पूरयन्तु – $4 \times 1 = 4$

परीक्षाभवनम्

तिथिः

पूज्यपाद पितः !

(i) ................ नमो नमः। अहं गृहात् प्रस्थाय अमृतसरनगरे (ii) ................ अवतीर्य छात्रावासम् सुखेन प्राप्तः। अस्मिन् कक्षे (iii) ................ प्रकाशस्य च चागमनाय वातयानानि तिष्ठन्ति। अत्र पानाशनयोः (iv) ................ । चिन्ता न कार्या। मातृपादयोः प्रणामः अस्तु।

भवदीयः पुत्रः
रजतः

**मञ्जूषा**

| सुप्रबन्धः, सादरं, रेलयानात्, वायोः । |
|---|

(ख) निर्दिष्टं चित्रं दृष्ट्वा प्रदत्तवाक्यानि पठित्वा च मञ्जूषा प्रदत्तैः उचितपदैः रिक्तस्थानानि पूरयित्वा लिखत – $4 \times 1 = 4$



**प्रश्नाः –**

(i) अस्मिन् चित्रे एकः ................ परिवारः वर्णितः।

(ii) ............. पुस्तकानि सन्ति।

(iii) प्रकोष्ठे मंचस्य ................ समाचारपत्रम् अस्ति।

(iv) एका बालिका स्वपुस्तकानि ................ स्थापयति।

**मञ्जूषा**

| उपरि, कापाटिकायाम्, आदर्शः, कापाटिकायाम्। |
|---|

**खण्डः 'ग'**

**(पठित-अवबोधनम्)**

**3.** अधोनिर्दिष्टगद्यांशस्य हिन्दीभाषायाम् सरलार्थः लेखनीयः – 1 × 4 = 4

गच्छ, गच्छ, जम्बुक। त्वमपि किञ्चिद् गूढ़प्रदेशम्। यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धः परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः।

**अथवा**

अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत। पश्यतः एव सर्वत्र जलोपप्लवः सञ्जातः। कृषकः हर्षातिरेकेण कर्षणाविमुखः सन् वृषभौ नीत्वा गृहमगात्।

**4.** अधोनिर्दिष्टश्लोकस्य हिन्दीभाषायां सरलार्थः लेखितव्यः – 1 × 4 = 4

शरीरायासजननं कर्म व्यायाम संज्ञितम्।
तत्कृत्वा तु सुखं देहं विमृद्नीयात् सभन्ततः।।

**अथवा**

विद्वांसः एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिता।
अन्येषां वदने ये तु ते चक्षुर्नामनी मते।।

**5.** अधोप्रदत्तसूक्तिषु ***द्वयोः*** भावार्थः स्पष्टयितव्यः – 2 × 2 = 4

(क) मानवाय जीवनं कामये नो जीवन्मरणम्।

(ख) आरोग्यं चापि परमं व्यायामादुपजायते।

(ग) विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।

(घ) प्राणिनां जायते हानिः परस्परविवादतः।

**6.** अधः प्रदत्तं गद्यांशं सम्पठ्य निर्दिष्ट-प्रश्नोत्तराणि संस्कृतेन लेखितव्यानि – $3 \times 1 = 3$

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्न समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुम् च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।

***प्रश्नाः –***

(क) निर्धनः जनः कथं धनं (वित्तं) उपार्जितवान् ?

(ख) निर्धनः स्वपुत्रं कुत्र प्रवेशं दापयितुं सफलः जातः ?

(ग) निर्धनः केन पीडितः आसीत् ?

**7.** अधोनिर्दिष्टं श्लोकं पठित्वा प्रदत्तप्रश्नयोः उत्तरे संस्कृतेन लेखितव्ये – $2 \times 1 = 2$

क्रोधो: हि शत्रुः प्रथमो नराणां, देहस्थितो देह विनाशाय।

यथा स्थितः काष्ठगतो हि वह्निः, स एव वह्निर्दहते शरीरम्।।

***प्रश्नाः –***

(क) क्रोधः नराणां कीदृशः शत्रुः ?

(ख) शरीरं कः दहते ?

**8.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $3 \times 1 = 3$

(क) बुद्धिमती <u>चपेटया</u> पुत्रौ प्रहृतवती।

(ख) व्यायामं कुर्वतः <u>विरुद्धं</u> भोजनम् अपि परिपच्यते।

(ग) <u>धेनूनाम्</u> माता सुरभिः आसीत्।

**9.** प्रश्नपत्रे लिखितान् श्लोकान् विहाय 'शेमुषी – भाग – 2' स्वपाठ्यपुस्तकात् *एकं* श्लोकं संस्कृतभाषायां लिखत। $1 \times 4 = 4$

## खण्डः 'घ'

## (अनुप्रयुक्त-व्याकरणम्)

**10.** (क) 'स्वरसन्धेः' ***अथवा*** 'व्यञ्जनसन्धेः' परिभाषां सोदाहरणं हिन्दीषायां लिखत। $1 \times 2 = 2$

(ख) 'द्विगुसमासस्य' ***अथवा*** 'द्वन्द्वसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषायाम् लिखत। $1 \times 2 = 2$

(ग) सम्प्रदानकारकस्य ***अथवा*** अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायाम् लिखत। $1 \times 2 = 2$



https://byjus.com

**11.** अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत – 3 × 1 = 3

(क) वयं ................ प्रसन्नाः भवेम्। (कदा/सदा)

(ख) ................ समयस्य सदुपयोगः करणीयः। (अद्य/सर्वदा)

(ग) मालां ................ ताड्य। (मा/सर्वतः)

**12.** अधोप्रदत्तोपपदविभक्ति-वाक्येषु उचितविभक्तिप्रयोगं कुरुत – 4 × 1 = 4

(क) रमा ................ गच्छति। (ग्रामाय/ग्रामं)

(ख) रामाय ............... रोचते। (दुग्धाय/दुग्धम्)

(ग) ................ पुत्रेण कः लाभः। (मुर्खम्/मूर्खेन)

(घ) दुष्टः ................ न जुगुप्सते। (पापात्/पापेन)

**13.** यथानिर्दिष्टं शब्दरूपाणि लिखत – 4 × 1 = 4

(क) 'राम' शब्दस्य सप्तमी, एकवचने।

(ख) 'साधु' शब्दस्य चतुर्थी, द्विवचने।

(ग) 'नदी' शब्दस्य पंचमी, बहुवचने।

(घ) 'युष्मद्' शब्दस्य तृतीया, एकवचने।

**14.** यथानिर्दिष्टं धातुरूपाणि लिखत – 4 × 1 = 4

(क) 'भू' धातु, लट्लकार, प्र० पु०, एकवचने।

(ख) 'पठ्' धातु, लङ् लकार, उ० पु०, द्विवचने।

(ग) 'गम्' धातु, लृट्लकार, म० पु०, बहुवचने।

(घ) 'कृ' धातु, लोट्लकार, प्र० पु०, द्विवचने।

**15.** अधोलिखितेभ्यः क्रियापदेभ्यः उपसर्गान् पृथक्कृत्वा लिखत – 3 × 1 = 3

(क) दुर्गमः

(ख) अनुगच्छति

(ग) प्रतिवदति।

## खण्डः 'ङ'

### (बहुविकल्पीय प्रश्नाः)

**16.** अधोलिखितेषु प्रश्नेषु प्रदत्त वैकल्पिकचतुर्षु उत्तरेषु एक शुद्धम् उत्तरं लिखत – 16 × 1 = 16

(क) 'ने + अनम्' अत्र किं सन्धियुक्तपदम् ?

(i) नयनम् (ii) नेअनम्

(iii) नेऽनम् (iv) नायनम्

(ख) 'नमस्ते' इति पदे कः सन्धिविच्छेदः ?

(i) नम + अस्ते (ii) नमः + ते

(iii) नम + ते (iv) नम् + आस्ते

(ग) 'राजपुरुषः' इति पदस्य विग्रहम् किम् ?

(i) राज्ञ पुरुषः (ii) राज्ञः पुरुषः

(iii) राज पुरुषः (iv) राज्ञा पुरुषः

(घ) 'अनुरथः' इति पदे कः समासः ?

(i) द्विगु (ii) अव्ययीभाव

(iii) द्वन्द्वः (iv) बहुव्रीहिः

(ङ) 'सुलभः' इति पदस्य विलोमशब्दः किम् ?

(i) दुर्लभः (ii) दुष्करः

(iii) दुर्लभा (iv) दुखदः

(च) 'आगतः' इति पदस्य विलोमपदम् किम् ?

(i) अगतः (ii) आगातः

(iii) अनागतः (iv) आवगतः

(छ) 'सत्वरम्' इति पदस्य पर्यायपदम् किम ?

(i) अवनि (ii) गच्छति

(iii) याति (iv) शीघ्रम्

(ज) "बालिका" इति पदस्य पर्यायपदम् किम ?

(i) कन्या (ii) बालः

(iii) प्रौढ़ा (iv) युवति

(झ) 'दया + मतुप्' इति संयोगे किं रूपम् ?

(i) दयावान् (ii) दयालुः

(iii) दयामान् (iv) दयामत्

(ञ) 'लघुत्वम्' इति पदे कः प्रत्ययः ?

(i) ल्यप् (ii) क्त्वा

(iii) त्व (iv) टाप्

(ट) 'षष्टिः' इति पदे का संख्या ?

(i) 6 (ii) 60

(iii) 16 (iv) 26

(ठ) "नवविंशति" इति पदे का संख्या ?

(i) 29 (ii) 92

(iii) 9 (iv) 39

(ड) "कुमारयोः कुशलवयोः" अत्र किं विशेषण पदम् ?

(i) कुश (ii) लवयोः

(iii) कुमारयोः (iv) कुशलवयोः

(ढ) "उदात्तरम्यः समुदाचारः" अत्र किं विशेष्य पदम् ?

(i) उदात (ii) समुदाचारः

(iii) रम्यः (iv) उदात्तरम्यः

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं पूरयत –

(i) बालकः सायं ................ वादने पठति।




(ii) अहं प्रातः ................ वादने भ्रमणाय गच्छामि।

